नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 23

No. of Printed Pages – 8

142891

# VU-94-Sans. Vangmay

## संस्कृत वाङ्मय (अनिवार्यः)

**वरिष्ठ उपाध्याय परीक्षा, 2022**

**समय : 2 घण्टे 45 मिनट (पादोन होरात्रयम्)**

**पूर्णांक : 80**

परीक्षार्थिभ्यः सामान्यनिर्देशाः

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

(5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

खण्ड – अ

1. वस्तुनिष्ठप्रश्नाः 12 × 1 = 12

(i) "यञञोश्च" इति सूत्रम् अस्ति – 1

(अ) गणसूत्रम् (ब) विधिसूत्रम्

(स) अधिकारसूत्रम् (द) संज्ञासूत्रम्

(ii) "वात्स्यः" इत्यत्र प्रत्ययोऽस्ति – 1

(अ) नञ् (ब) अण्

(स) इञ् (द) यञ्

(iii) लकाराः सन्ति – 1

(अ) दश (ब) नव

(स) एकादश (द) द्वादश

(iv) धर्मं चरति – 1

(अ) नधार्मिकः (ब) अधार्मिकः

(स) धार्मिकः (द) सामाजिकः

(v) शिवराजविजयग्रन्थोऽस्ति – 1

(अ) सामाजिकः (ब) ऐतिहासिकः

(स) धार्मिकः (द) नैतिकः

(vi) पतिपुत्ररहितायाः स्त्रियः नाम अस्ति – 1

(अ) वयस्या (ब) वृद्धा

(स) अवीरा (द) विधवा

(vii) पति – पत्न्योः मातुः नाम विद्यते – 1

(अ) श्वश्रूः (ब) श्वशुरः

(स) मातुलानी (द) पितृव्यः

(viii) बुधः अस्ति – 1

(अ) योगः (ब) तिथिः

(स) करणम् (द) वारः

(ix) तिथीनां संज्ञाः भवन्ति – 1

(अ) नव (ब) पञ्च

(स) सप्त (द) दश

(x) प्रतापदुर्गद्वारपालस्य परीक्षां कः कृतवान् ? 1

(अ) शिववीरः (ब) अपजलखानः

(स) गौरसिंहः (द) सैनिकः

(xi) श्रोत्रं केन विभाति ? 1

(अ) कंकणेन (ब) दानेन

(स) कुण्डलेन (द) श्रुतेन

(xii) सेवाधर्मः परमगहनः केषामपि अगम्यः ? 1

(अ) बालकानाम् (ब) योगिनाम्

(स) देवानाम् (द) मनुष्याणाम्

2. रिक्तस्थानानि पूरयत – 6 × 1 = 6

(i) लः ______ च भावे चाऽकर्मकेभ्यः । 1

(ii) कन्यायाः ______ च । 1

(iii) छायेव मैत्री ______ सज्जनानाम् । 1

(iv) प्रतापदुर्गस्य द्वारपालः भुशुण्डीं ______ निधाय इतस्ततः अटनं कुर्वन् आसीत् । 1

(v) मनुष्या मानुषा मर्त्या ______ मानवा नराः । 1

(vi) जनयित्री प्रसूर्माता ______ भगिनी स्वसा । 1

3. अतिलघूत्तरात्मक प्रश्नाः 12 × 1 = 12

(i) 'तस्येदम्' इति सूत्रेण कः प्रत्ययः भवति ? 1

(ii) 'आश्वपतम्' इत्यत्र अण् प्रत्ययः केन सूत्रेण भवति ? 1

(iii) नृपस्त्रियः द्वे नामनी लिखत । 1

(iv) परधने केषां स्पृहा भवति ? 1

(v) 'अनद्यतने लङ्' इति सूत्रस्य अर्थो लेख्यः । 1

(vi) गौरसिंहः कस्य वेषं गृहीत्वा अपजलखानस्य शिविरं गतवान् ? 1

(vii) प्रायेणाधममध्यमोत्तम-गुणः कस्मात् जायते ? 1

(viii) सिंहस्य अधिपतिः कः ग्रहः ? 1

(ix) एकस्मिन् दिने कति प्रहराः भवन्ति ? 1

(x) संख्याः द्वे नामनी लिखत । 1

(xi) ताराणां समूहः किमुच्यते ? 1

(xii) एकस्मिन् अहोरात्रे कति होराः भवन्ति ? 1

## खण्ड–ब

लघूत्तरात्मक प्रश्नाः

4. गीता जलं मुखं प्रक्षालयति । इत्यत्र रेखांकितं पदं संशोधयत । 2

5. श्रीगणेशं नमः । इत्यत्र रेखांकितं पदं संशोधयत । 2

6. एषः बालिका अस्ति । इत्यत्र रेखांकितं पदं संशोधयत । 2

7. रिक्तासंज्ञायां काः तिथयः भवन्ति ? 2

8. ज्योतिषशास्त्रानुसारं ग्रहाः कति सन्ति ? नामानि लिखत । 2

9. कोपनायाः स्त्रियः द्वे नामनी लिखत । 2

10. 'तनयः – अपत्यम्' इत्यत्र अर्थभेदः प्रदर्शनीयः । 2

11. कीदृशः जनः परिहर्तव्यः ? 2

12. पं. अम्बिकादत्तस्य संक्षिप्तपरिचयः लेख्यः । 2

13. 'अनुदात्तङित आत्मनेपदम्' इति सूत्रं व्याख्येयम् । 2

14. 'भवन्तु' इति रूपं साधयत । 2

15. 'स्त्रीभ्यो ढक्' इति सूत्रस्य सोदाहरणम् अर्थो लेख्यः । 2

16. 'दाक्षिः' इति प्रयोगं साधयत । 2

खण्ड – स

17. अधोलिखितेषु कौचिद् द्वौ प्रयोगौ ससूत्रं साधनीयौ । 3

(क) शिक्षकः (ख) त्वदीयः (ग) दैत्यम्

18. अधोलिखितेषु कौचिद् द्वौ प्रयोगौ ससूत्रं साधनीयौ । 3

(क) कौशेयम् (ख) दाधिकम् (ग) मायूरः

19. अधोलिखितेषु कौचिद् द्वौ प्रयोगौ ससूत्रं साधनीयौ । 3

(क) भवन्ति (ख) बभूव (ग) अभूतम्

20. अधोलिखितयोः श्लोकयोः कस्यचिद् एकस्य श्लोकस्य सप्रसङ्गं व्याख्या कार्या । 1 + 2 = 3

(क) रे रे चातक ! सावधानमनसा मित्र ! क्षणं श्रूयता –

मम्भोदा बहवो वसन्ति गगने सर्वेऽपि नैतादृशाः ।

केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,

यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ।।

(ख) विपदि धैर्यमथाभ्युदये क्षमा,

सदसि वाक्पटुता, युधि विक्रमः ।

यशसि चाऽभिरुचिर्व्यसनं श्रुतौ

प्रकृतिसिद्धमिदं हि महात्मनाम् ।।

## खण्ड – द

21. अधोलिखितेषु कौचिद् द्वौ प्रयोगौ ससूत्रं साधनीयौ । 2 + 2 = 4

(क) आक्षिकः (ख) आश्मनम्

(ग) गत्यम् (घ) धुर्यः

22. अधोलिखितयोः गद्यांशयोः कस्यचिद् एकस्य गद्यांशस्य सप्रसंगं व्याख्या कार्या । 1 + 3 = 4

(क) विजयपुराधीशः स्वप्रेषितमपजलखानं सेनापतिं सम्बोध्य लिखति यत् – वीरवर ! महाराष्ट्रराजेन सह योद्धुं प्रस्थितोऽसीति मा स्म भूत्कश्चनान्तरायस्तव विजये । शिवं युद्धे जेष्यसिचेत,पदभ्यां सिंहं जितवानसीति मंस्ये ।

(ख) दौवारिकः – हंहो ! कपटसंन्यासिन् । कथं विश्वासघातं स्वामिवञ्चनञ्च शिक्षयसि ? ते केचनान्ये भवन्ति जार-जाताः, ये उत्कोचलोभेन स्वामिनं वञ्चयित्वा आत्मानम् अन्धतमसे पातयन्ति, न वयं शिवगणास्तादृशाः । (संन्यासिनो हस्तं धृत्वा) इतस्तु सत्यं कथय कस्त्वं ? कुतः आयातः ? केन वा प्रेषितः ?

23. अधोलिखितेषु वाक्येषु केषाञ्चित् चतुर्णां संस्कृतानुवादो विधेयः । 1 + 1 + 1 + 1 = 4

(i) आकाश में पक्षी उड़ते हैं ।

(ii) वृक्ष से पत्ते गिरते हैं ।

(iii) छात्र दौड़ते हैं ।

(iv) हम गेंद से खेलते हैं ।

(v) व्यायाम से शरीर बलवान होता है ।

(vi) रत्नेश आज घर जायेगा ।

(vii) राम के साथ मोहन भी घर जाता है ।

(viii) बालकों में मोहित श्रेष्ठ है ।

---

DO NOT WRITE ANYTHING HERE

CONFIDENTIAL